International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 235-238
© 2024 IJSR
www.anantaajournal.com
Received: 18-02-2024
Accepted: 20-03-2024

**मोहित जोशी**
शोधच्छात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः,
देवप्रयागः, उत्तराखण्ड, भारत

**Corresponding Author:**
**मोहित जोशी**
शोधच्छात्रः, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः,
देवप्रयागः, उत्तराखण्ड, भारत

# कच्छवंशमहाकाव्ये रसतत्त्वविमर्शः

**मोहित जोशी**

## प्रस्तावना

पदार्थायुर्वेदसाहित्यसम्बद्धेषु चतुर्ष्वर्थेषु प्रयुक्तः रसशब्दः । तैत्तरीयोपनिषदि प्रसिद्धं यत् – 'रसो वै सः' रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति । विश्वकोशेऽपि रसः विविधार्थेषु प्रतिपादितो वर्तते -

रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः ।
शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे ॥

वात्स्यायनकृतकामसूत्रस्य जयमङ्गलाटीकायां रसभावाद्यर्थः स्पष्टीकृतोऽस्ति यत् – ' नायकस्य शृङ्गारादिषु य इष्टो रसो भावः स्थायिसञ्चारिसात्विकेषु लीलाचेष्टितानि तेषामनुवर्तनम् । भारतीयकाव्यशास्त्रे रससिद्धान्तस्याधाराभूततत्त्वानि नाट्यशास्त्रे भरतप्रतिपादितस्थायिव्यभिचारिसात्त्विकभावप्रभृतीनि वर्तन्ते । एकोनपञ्चाशतभावानामेषां भरतप्रभृतिपण्डितराजजगन्नाथं यावत् कविकाव्यसहृदयमुखापेक्षं विशदविवेचनं परिवर्धनञ्च परिलक्ष्यते । यद्यपि चित्तवृत्तिरूपाणामभिप्रायरूपाणां वा भावनामानन्त्यं, तथापि भरतमुनेः मतानुसारेण एकोनपञ्चाशत्सङ्ख्यकानां तदानुषङ्गीकाणां (रसगङ्गाधरे पण्डितराजेन प्रदर्शितानाम्) अपि भावानां काव्यरसाभिव्यक्तिहेतुत्वम् । उक्तं हि मुनिना 'एवमेते रसाभिव्यक्तिहेतवः एकोनपञ्चाशद्भावाः काव्यरसाभिव्यक्तिहेतवः[1]। ते च भावविशेषाः मुनिना विभागरूपेण विभाजिता – स्थायिभावाः (अष्टसङ्ख्यकाः), सात्त्विकभावाः (अष्टसङ्ख्यकाः), व्यभिचारिभावाः (त्रयस्त्रिंशत्सङ्ख्यकाः) एभ्यः भावेभ्यश्च सामान्यगुणयोगेन रसाः निष्पद्यन्ते । एवं निष्पन्नाः रसाः काव्यस्यात्मान इति अविरोधेन सर्वैरपि अङ्गीकृतस्सिद्धान्तः । रसं विना काव्यस्य काव्यत्वमेव न सङ्गच्छत इति हेतोः सर्वेऽपि कवयः लोकोत्तरवर्णनानिपुणाः रसपूर्णवर्णनेन स्वकाव्यं लोकोत्तरानन्ददायकं विदधति ।
प्रकृतमनुसरन्नहं मम संशोधनविषयीभूते कच्छवंशमहाकाव्ये तत्कर्त्री कथं रसानुसन्धानं कृतमित्यमुं विषयमत्र प्रस्तौमि ।

1 नाट्यशास्त्रम् - ६

सर्वप्रथमतया सर्वरसेषु आदिमस्य शृङ्गाररसस्योदाहरणम्- 'शृङ्गाररसो हि सञ्चारिणां नियमेनानुभवविषयत्वात् सर्वरसेभ्यः कमनीयतया प्रधानभूतः [2] रसस्यास्य लक्षणमिदम् –

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥

स्त्रीपुरुषहेतुकोऽयं रसः सम्भोग-विप्रलम्भभेदेन द्विधा उच्यते । तत्र सम्भोगशृङ्गारस्य उदाहरणं कच्छवंशमहाकाव्ये –

एवमेताभिरुर्वीन्द्रो राजकन्याभिरन्वितः ।
विजहार यथाकामं करिणीभिः करी यथा[3] ॥
रामसिंहात्मजः श्रीमांस्ताभिरद्भुतकान्तिभिः ।
विजहार गवाक्षेषु पुष्पतल्पसुगन्धिषु[4] ॥
नागरीलोलनयनपीतनूतनयौवनः ।
राजकन्या महाराजः परिणेतुं प्रचक्रमे[5] ॥
चोचूष्यमाणचारुश्रीश्चार्वङ्गीलोचनैश्चिरम् ।
स चामराञ्चलचलञ्चलाचान्तश्रमोऽचलत् ॥
निर्वाताब्जनिभेनाक्ष्णा वातायनगताः स्त्रियः ।
विलोकयन्विलोलाक्ष्यो निश्चक्राम पुरः पुरम्[6] ॥
अक्षिभ्रुवं नततया तुङ्गतया निस्तलौ स्तनौ सुतनोः ।
चिकुराविचकिलरुचिभिर्व्यतिराते दीप्तिमपरिमिताम् ॥
बाले द्विफाललम्बिताचिकुरदशाचारुचूचुकौ स्वकुचौ ।
उत्फणफणीन्द्रपुच्छच्छत्रमुखाविव निबोध निधिकुम्भौ[7]॥
दरमीलद्दृशा स्विन्नकम्पमानशरीरया ।
राणावत्या समं रात्रौ रेमे राजा शनैः शनैः[8] ॥

स्वकान्तया सह राज्ञः विहारवर्णनमत्र वर्तते । तेन सम्भोगशृङ्गाररसोऽत्र प्रतीयते ।

### हास्यरसः

हास्यरसस्य स्थायिभावो भवति हासः । विकारयुक्तवचनवेशभूषेत्यादयः आलम्बनविभावाः, चेष्टाद्युद्दीपनविभावाः, नयनोन्मीलनं चानुभावः, निद्रालसादयो व्यभिचारिभावाश्च । हास्यरसस्य लक्षणमिदम् – हास्यो विकृतपरवेषालङ्कारधार्ष्ट्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शनदोषोदाहरणादिभिर्विभावैः उत्पद्यते । तस्यौष्ठनासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिः अनुभावैः अभिनयः । व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधासूयादयः।

### हास्यरसस्योदाहरणं कच्छवंशमहाकाव्ये

तयो रहस्यचरितं जालान्तर्दत्तदृष्टिभिः ।
स्त्रीभिर्निभृतहासाभिर्जोषमाजुजुषे बहिः[9] ॥

### करुणरसः

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।[10]

### करुणरसस्योदाहरणानि कच्छवंशमहाकाव्ये

सङ्ग्रामस्तत्र तस्यासीत्कबन्धारब्धताण्डवः ।
निर्यदस्रनदीपूरमाञ्जिष्ठीकृतसागरः[11] ॥
सत्स्वप्युत्तमवाहनेषु बहुशः पद्भ्यां प्रपद्येश्वरी-
सिंहो हन्त तथा निरीक्ष्य पितरं हाहेति चुक्रोश हा ।
निर्मथ्याऽरणिमाशुशुक्षणिमरं सम्पादयाद्भिर्द्विजै-
रस्य क्षिप्रमकारयच्च महितामन्त्यक्रियां यज्वनः ॥
राजेन्द्रस्य निमीलनाज्ज्यपुरं जातंतदानीं महा-
शोकोद्रेकविविग्नया जनतया प्रक्रान्तहाहारवम् ।
ब्रूमो हन्त पुनस्त्रिविष्टपपदं मुद्धेतुकेतुस्फुर-
त्सौधश्रेणि तदागमोत्सुकसुरप्रक्रान्तहाहारवम्[12] ॥

### रौद्ररसः

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
आलम्बनमरिस्तस्य तच्चेष्टोद्दीपनं मतम् ॥[13]

### उदाहरणानि यथा कच्छवंशमहाकाव्ये

भ्राम्यद्भैरवभूतभैरवरवं नृत्यत्कबन्धोद्धवं

---

2 ध्वन्या. लोक- ३.३०
3 क.वं.म.का. – ८/८१
4 क.वं.म.का. – ९/१६२
5 क.वं.म.का. – १०/२३८
6 क.वं.म.का. – १०/२६५-२६६
7 क.वं.म.का. – १२-१३/२०१-२०२-२०३
8 क.वं.म.का. – १०/४५४
9 क.वं.म.का. – १०/४५५
10 सा.द.- ३.२२
11 क.वं.म.का. – ८/१६२
12 क.वं.म.का. – ११/१२२-१२३
13 सा.द.-३.२२७-२३०

चण्डीचर्वितवीरमुण्डमुदयच्छोणापगादुर्गमम् ।
उच्चैर्दन्तिशवव्यवस्थितभटं व्याकीर्णरत्नोत्कर-
द्योतद्योतितदिङ्मुखं खलु चिरं भाति स्म जन्याऽजिरम्[14]
॥
अथ दुन्दुभिधुङ्कारमुखरीकृतदिङ्मुखम् ।
बम्भ्रम्यमाणनाकस्त्रीविमुक्तवरमालिकम् ॥
नलिकास्त्रघटानिर्य्यद्गोलकैर्लोलदग्निभिः ।
विकीर्यमाणवेतण्डचण्डकङ्कालदन्तुरः[15] ॥
अस्मिन् पद्ये बीभत्ससहितः रौद्रः
सहृदयानामानन्दजनकः वर्तते ।
समुत्थितकबन्धौघैर्विष्वगारब्धताण्डवः ।
पुनः पुनर्दलेलेन कृत्तकृत्रिमजट्टपः[16] ॥
तदारभ्य प्रतापाग्निर्माधवस्य व्यजृम्भत ।
यस्मिञ्ज्वलति सर्वेऽपि शत्रवः शलभायिताः[17] ॥

**वीररसः –** उत्तमपात्राश्रितोत्साहस्थायिभावात्मको वीररसो वर्तते । तस्य शास्त्रीयलक्षणमिदम्-

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥[18]

इति । कच्छवंशमहाकाव्ये अस्य रसस्य बहून्युदाहरणानि लभ्यन्ते –

निजभटवधं श्रुत्वा सोमेश्वरस्य स नन्दनः ।
कमठपतिना प्रास्थाज्जेतुं महोबपुरप्रभुम् ।
यदजनि जयोऽजन्ये मन्ये स केवलमुच्चकैः
कमठपतिदोर्दण्डद्वन्द्वप्रचण्डिमहेतुकः[19] ॥
इत्थं गच्छत्स्वहः सु प्रतिभटकटकव्यूहविक्षोददक्षः
पृथ्वीराजानुमत्या दुरधिगमविलं काबिलं मङ्क्षु जित्वा ।
गच्छन्दिल्लीं स कच्छो यवननृपतिना घेवराघाटमध्ये
गौरीसाहेन रुद्धः पुनरधिसमरं तं गृहीत्वा मुमोच[20] ॥
जेतुं चन्द्रं जयाद्यं चलति रणचणे, चाहमाने तदुक्तो
नासीरं द्राग्ग्रसिष्ये वरमिति वितरन्कच्छदेवोऽप्यगच्छत्।
योद्धा योऽद्धा व्यधत्त प्रधनभुवि समुत्पाट्य दन्तीन्द्रदन्तौ
हं हो हुंकृत्य रंहो दधदितमितखाँखण्डनं खड्गचण्डः[21] ॥

14 क.वं.म.का. – ४/९१
15 क.वं.म.का. – १४/१९-२०
16 क.वं.म.का. – १४/२४
17 क.वं.म.का. – १४/३९
18 सा.द -३.२३२-२३४
19 क.वं.म.का. – ४/८२
20 क.वं.म.का. – ४/८५
21 क.वं.म.का. – ४/८६

एवं प्रद्युम्नदेवे निपतति प्रतो जैतसी लाखणाख्यः ।
कान्हश्चेति त्रयोऽमी मथितरिपुवला भ्रातरोऽप्यस्य पेतुः ।
भीमो भद्रो वलाद्यः समरसमरसौ द्वौ सुतौ तातपार्श्वे
कृत्ताङ्गौ पेततुर्द्रागपरिमितचमूं चूर्णयित्वा भुजाभ्याम्[22]
॥

**भयानकरसः**
भयानको भयस्थायिभावो कालाऽधिदैवतः ।[23]

**कच्छवंशमहाकाव्ये तस्योदाहरणानि**

अन्येद्युः कमठेन्द्रस्य युद्धोद्योगं निषम्य सः ।
समुद्रवर्त्मना भीतो नावा क्वापि पलायत[24] ॥
अप्रमाणान्यनीकानि पश्यन्सज्जानि पङ्क्तिशः ।
साध्वसोन्निद्ररोमाञ्चः स्पशेन्द्रः सोऽपलायत[25] ॥
ब्रह्माण्डसम्पुटाभिदा कलशादकस्मा-
दुद्गच्छता धृतिमुषा ध्वनिना विचेताः ।
मल्लार आः किमिदमित्यवलोकमानो
भीतः पलायत मिथो हतनैजसैन्यः[26] ॥
योगिनीभिस्तृषार्ताभी रक्तसम्भृतखर्परः ।
हतवीररथारूढोत्तालवेतालभीषणः[27] ॥

**बीभत्सरसः**

जुगुप्सास्थायिभावस्तु वीभत्सः कथ्यते रसः । [28]

**वीभत्सरसस्योदाहरणानि कच्छवंशमहाकाव्ये**

क्षतजक्षतजोद्गारैः प्रवर्त्तित नदीशतः ।
विशिष्य विस्रगन्धेन विमूर्च्छितमहाभट्टः[29] ॥
क्रव्यादैः क्रव्यमादाय भीतैर्वीरविमर्दतः ।
आरुह्य कुञ्जरशवान् समारब्धभुजिक्रियः[30] ॥
वीरमुण्डानि संगृह्य भैरवेण विवल्गता ।
साकूतं सह भैरव्यारब्धकन्दुककौतुकः[31] ॥

22 क.वं.म.का. – ४/८९
23 सा.द.-३.२३५-२३८
24 क.वं.म.का. – ८/१४२
25 क.वं.म.का. – ८/१८४
26 क.वं.म.का. – १२-१३/२६०
27 क.वं.म.का. – १४/२१
28 सा.द.-३.२३९
29 क.वं.म.का. – १४/२२
30 क.वं.म.का.. – १४/२६

**अद्भुतरसः –** लोकोत्तरघतनया वस्तुना वा अद्भुतरस उत्पद्यते। लक्षणं यथा –

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्॥ [32]

**अद्भुतरसस्योदाहरणानि कच्छवंशमहाकाव्ये**

अहो सत्त्वमहो धैर्यमहो अस्याकृतिच्छटा।
इति चिन्तां चिरं कृत्वा रामसिंह समादिशत्[33]॥
युद्ध्यन्तं वीक्ष्य रामेन्द्रं गगनाङ्गणगास्तदा।
शक्रादयो ह्यनिमिषा रामचन्द्रस्य सस्मरुः[34]॥

एवं यद्यपि इदं काव्यमैतिहासिकवस्त्वाधारितं राज्ञां वर्णनाद्वीररसप्रधानं च वर्तते तथापि कविना सर्वे रसाः अङ्गत्वेनानीय काव्यस्यास्य रसात्मकत्वं साधितमस्ति इति शम्।

**सन्दर्भ**


1. 'कच्छवंशमहाकाव्यम्' (वैद्यश्री भट्टः कृष्णरामः) (सम्पादकौ - डॉ. पाण्डेयः रमाकान्तः, डॉ.दाधीच रानी) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, प्रथम संस्करण - २०१२
2. काव्यप्रकाशः – मम्मट कृष्णदास अकादमी, वाराणसी, १९९७
3. साहित्यदर्पणम् - लक्ष्मीव्याख्या (शर्मा कृष्णमोहनः), चौखम्बासंस्कृतसंस्थान, वाराणसी, २००१
4. अमरकोषः – अमरसिंहः चौखम्बासुरभारती प्रकाशनम्, वाराणसी – २००३
5. नाट्यशास्त्रम् –भरतमुनिः चौखम्बासुरभारती प्रकाशनम्, वाराणसी – २००९
6. रसगङ्गाधरः –पण्डितराजजगन्नाथः चौखम्बासुरभारती प्रकाशनम्, वाराणसी – २०१२
7. ध्वन्यालोकः –आनन्दवर्धनाचार्यः चौखम्बा विद्याभवन, वाराणसी - २०१४


---

31 क.वं.म.का. – १४/२७

32 सा.द.३.२४२-२४४

33 क.वं.म.का. – ९/१००

34 क.वं.म.का. – ९/२११